International Journal of Sanskrit Research 2021; 7(2): 101-103

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(2): 101-103
© 2021 IJSR
www.anantaajournal.com
Received: 19-10-2020
Accepted: 29-11-2020

**डॉ0 दुर्गेश झा**
पत्रालयश्च–वरदाहा, भाया
अन्धराठाढ़ी, मण्डलम्, मधुबनी, बिहार,
भारत

**Corresponding Author:**
**डॉ0 दुर्गेश झा**
पत्रालयश्च–वरदाहा, भाया
अन्धराठाढ़ी,मण्डलम्, मधुबनी, बिहार,
भारत

# विश्वेदेवशब्दस्य साधुत्वासाधुत्व–विमश

## डॉ0 दुर्गेश झा

**प्रस्तावना**

बहुव्रीहौ विश्वशब्दः पूर्वपदभूतः संज्ञायामन्तोदात्त इत्यर्थक' बहुव्रीहौ विश्वं संज्ञायामि 'त्यनुशासनमुदाजहार विश्वकर्मा, विश्वेदेवः, आविश्वदेवं सत्पतिम्। अत्र संज्ञायामित्यस्य प्रत्युदाहरणं–विश्वदेवः, बहुव्रीहावित्यस्य इति वार्तिकव्याख्यानभूते बहुव्रीहौ विश्वस्यान्दोत्तात्संज्ञायां मित्रजिनयोरन्त इत्येतद्भवति विप्रतिषेधेन। ' बहुव्रीहौ विश्वं संज्ञाया [1] मित्यस्यावकाशः विश्वदेवः विश्वयशाः।

अस्य सूत्रस्य व्याख्यापरे शब्देन्दुशखरेऽपि संज्ञायामिति वहुव्रीहिर्विशेषणं कर्म्मधारये विश्वदेवः। अत्र विश्वेदेव इत्यपिपाठ इति नागेश उदलेखीत्।

एवमेव क्षुल्लकमहच्छब्दौ पूर्वपदभूतौ प्रकृतिस्वरौ भवतो वैश्वदेवशब्दे परे इत्यर्थक '' क्षुल्लकश्च वैश्वदेवे'' इत्यस्योदाहरणे क्षुल्लकवैश्वदेवम् महावैश्वदेवमिति प्रयुज्जते। क्षुल्लक इति तु क्षुधं लातीति विगृह्य ''आतोऽनुपसर्गे क [2] '' इति के जाते ततोज्ञातादिषु के क्षुल्लक इति।

वैश्वदेवी पुनती देव्यागादिति यजुर्वेदसंहितास्थमन्त्रमपि विभक्तिलुकैव प्रायुङक्त। विश्वेभ्यो देवेभ्य आगता इति उव्वट– महिधरभाष्ययोर्विजग्राह ।[3]

विश्वोत्तरविभक्तिलुकैव विश्वदेवशब्दस्य वेदे व्याकरणे च समुपलभ्यामानत्वादेव पार्वणश्राद्धपद्धतौ विश्वेषां देवानां कृतैतच्छ्राद्धप्रतिष्ठार्थम्, विश्वेभ्यो देवेभ्य, स्थानमसि, विश्वान् देवानहमावाहयिष्ये– इत्याद्यमसस्ता एव प्रयोगाः समपुलभ्यन्ते।

शब्दकल्पद्रुमेऽपि विश्वदेवशब्दमुपादाय विश्वे दीव्यतीति दिव अच् पुं. इति, गणे देवताविशेष इत्यमरकोषटीकायाम् ।[4]

विश्वदेवौ क्रतुदक्षौ सर्वास्विष्टिषु विश्रुतौ।
नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च पैतृके।।
नवान्लालम्भने देवौ कामकालौ सदैव हि।
अपि कन्यां गते सूर्य्ये कामकालौ सदैव हि।
अपि कन्यां गते सूर्य्ये श्राद्धे च ध्वनिरोचकौ ।।[5]

पुरूरवा माद्रवाश्च विश्वदेवो च पार्वणीति।। वञ्पुिराणस्थगणभेदनामकाध्याये।

श्रुतं मे विश्वदेवतां यद्रहस्यं मनीषिणाम्।
तदिदं सर्वदेवानां तत्त्वतस्तत्त्ववादिनामिति ।।[6]

नरसिंहपुराणस्य ब्राह्मणधर्म्मकथनपरके सप्तपञ्चाशदध्याये अष्टपञ्चाशदध्याये च क्रमशः–

'कृतस्नानस्तु कुर्वीत वैश्वदेवं दिनेदिने।
वैश्वदेवं ततः कुर्य्याद्बलिकर्म यथाविधी'ति।।
''विप्रो वा यदि वा मूर्खो द्वेष्यः पण्डित एव वा।
वैश्वदेवे तु सम्प्राप्ते सोऽतिथिः सर्गसंक्रमः'' ।।[7]

इत्थञ्च वेद–बहुतरपुराणरीत्या व्याकरणप्रमाणभूतपाणिनि–भट्टोजिदीक्षित– पतञ्जलि–नागेशप्रभृतीनां देवकल्पानां पुरोदीरितप्रमाणचयैश्च विश्वेदेवशब्दस्यासाधुत्वं पर्य्यवस्यति।
अत्र कल्पे ''सप्तव्याहृतीनां प्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुब्बृह–तीपङ्क्ति– त्रिष्टुब्जगत्यश्छन्दांस्यग्निवाय्वा– दित्यबृहस्पतिवरूणेन्द्र–विश्वेदेवा देवता अनादिष्टप्रायश्चिते प्राणायामे विनियोग' [8] इति सन्ध्यावन्दनप्रकरणे श्रूयमाणस्य विनियोगघटकस्य विश्वेदेवा इत्यस्य कथन्तरामुपपत्तिः संगच्छताम्, विश्वेदेवा इत्यस्य द्विपदत्वे सखण्डत्वे अग्निवाय्वादित्यबृहस्पतिवरूणेन्द्रेण विश्वे इत्यस्य समासे अविशिष्टस्य देवा इत्यस्य देवतेत्यनेनानन्वितार्थत्वात्, विश्वेदेवशब्दस्य एकपदत्वे अर्थात् अखण्डत्वे तादृशबृहस्पतिवरुणेन्द्रेण विश्वेदेवा इत्यस्य समासे तस्योद्देश्यत्वेन देवतेत्यस्य विधेयत्वेनान्वये सुकरेऽपि तादृशप्रयोगस्यैवानुपपत्तिः, समासावयवतया विश्वोत्तरवर्तिनः सुपः लुकः प्रसक्तेः। यदि तु 'न पदान्त द्विर्वचनवरेयलयोपस्वरसवर्णानुस्वारे [9] 'त्यत्र वरेयोऽजादेशः स न स्थानिवदिति व्याख्याय सौत्रत्वात्सहविवक्षाभावेऽपि द्वन्द्वतां सप्तम्या अलुक्त्वं च प्रतिपाद्य तथा ''पुरुषाद्वयध–विकारसमहतेनकृतेष्वि'' [10] त्यादौ भाष्यकारप्रयोगात्तेनत्यस्य द्वन्द्वमध्ये निवेशं विधाय तादृशप्रयोगाणां यथा साधुत्वं तथैवात्र द्वन्द्वान्तः पातित्वेऽपि एतत्प्रयोगस्य शिष्टादृतत्वेन लुगभावः कल्प्येत चेत् न कापि क्षतिः। अथवा अग्निवाय्वादित्यबृहस्पतिवरुणेन्द्रविश्वे इत्येतत्पर्य्यन्तमेव द्वन्दः। न च द्वन्दे चेत्यनुशासने धृतायुधे बृहस्पतिवरूणेन्द्रविश्वे इति प्रयोग उपपादयितुमशक्य इति वाच्यम्, यतः विभाषाजसीति सूत्रं जस्विषये सर्वनामसंज्ञा प्रतिप्रसूते। बृहस्पतिवरूणेन्द्रविश्वे इत्येतपयर्य्यन्तं कृतद्वन्द्वस्य साधुत्वोपादनेऽपि देवा देवता इत्यत्र प्राप्तशाब्दबोधानुपपत्तिरूपक्षुद्रोपद्रवं तु पुरस्तात्तनरीतिरेव शमयितुं पर्य्याप्नोति, सा च घटो नीलघटः, दण्डवान् रक्तदण्डवानित्यादावभेदसम्बन्धावछि न्ननीलत्वावच्छिन्न–घटत्वावच्छिन्न – प्रकारतानिरूपित– घटत्वावच्छिन्नविशेष्यताकः, एवम् अभेदसम्बन्धा – वच्छिन्न– रक्तत्वावच्छिन्न–दण्डवत्त्वावच्छिन्नप्रकारतानिरूपित– दण्डवत्त्वावच्छिन्न – विशेष्यातकः शाब्दोबोधो नवीनादृतो विधेयकोटावधिकावगाही यथा प्रसिद्धयति तथैव अभेदसम्बन्धावच्छिन्नतादृशवरुणेन्द्रविश्वत्वावच्छिन्न– देवत्वावच्छिन्न – प्रकारतानिरूपित – देवतात्ववच्छिन्न– विशेष्याकः शाब्दबोधः सम्भवतीति।

ननु देवगणविशेषे विश्वेदेवा इत्यस्य शक्तत्वात् संज्ञात्वेन संज्ञोपतर्जनीभूतानां सर्वनामसंज्ञायाः पर्य्युदस्तत्वात्कथं श्यादिकार्य्यप्रयोजन – कसर्वनामत्वमित्यपरे प्रत्यवतिष्ठन्ते, तन्नेतरे सहन्ते, सर्वादीनां केवलरूढत्वेनेन्द्रादिपदानामिव रूढत्वरूप–संज्ञात्वस्य सर्वत्राव्यभिचारित्वेन व्यावर्त्याभावात् संज्ञाप्रतिषेधो वैयर्थ्यमासादयन् आधुनिकसौतस्यैव संज्ञात्वभिप्रैति। एवञ्च वेदप्रसिद्धत्वेन देवगणविशेष–विश्वेदेवा इत्यस्येश्वरसौताभावादज्ञात्वेन तत्र सर्वनामत्वं निष्प्रत्यूहमेव। एतेन पूर्वादयो दिशः संज्ञाप्रतिषेधात्पूर्वस्यां दिशि यान्तीत्यादिप्रयोगाणां कथन्ता निरस्ता, दिक्षु चिरन्तनः सौत इत्याधुनिकसौतरूपसंज्ञात्वाभावात् सर्वनामत्वप्रयुक्तकार्य्याणां निर्विचिकत्सं प्रवृत्तिः। अतएव–

दिशि मन्दाचले तेजो दक्षिणस्यां रवेरपि।
तस्यामेव रघोः पाण्डयाः प्रतापं न विषेहिरे ।।[11]

इति रविप्रतापादधिको रघुप्रताप इत्यतिशयोक्तिगर्भिता कालिदास – सूक्तिराञ्जस्येनोपपद्यते।
अथ विश्वेदेवशब्दोपपत्तौ अधस्तना वाचोयुक्तीः प्रदर्शयति शब्दस्तोममहानिधौ विश्वेदेव इति प्रतीकमुपादाय ''पुं0 बहु0 कर्म0 अलुक्समासः।

क्रतुर्दक्षो वसुः सत्यः कामः कालस्तथा ध्वनिः।
रोचनो माद्रवश्चैव तथा चान्यः पुरूरवाः।।
विश्ववेदेवा भवन्त्येते दश श्राद्धेषु पूजिताः।।
इत्युक्ते श्राद्धभेदे विश्वेदेवस्तु वऋौ पुंलिंः ।।'' [12]

मार्कण्डेयपुराणस्थश्राद्धप्रकरणे–

विश्वेदेवविहीनन्तु केचिदिच्छन्ति सत्तमाः । [13]
श्रीमद्भागवते षष्टस्कन्धे दशमेऽध्याये–
रूद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः।
मरूद्भिर्ऋभुमिः साध्वैर्विश्वेदेवैर्मरूत्पतिः ।।[14]

तत्रैव षष्ठस्कन्धस्य सप्तमेध्याये– ''विश्वदेवैश्च साध्यैश्च नासत्याभ्यां परिश्रित' [15] इत्यादिष्वसमस्तेष्वपि विभक्तेरलुकैव प्रयुयोज।
अत्रायं निष्कर्षः– पुराणादिषु परिदृश्यमानविश्वेदेवशब्दस्य पाणिनीयानुशासनहीनत्वेनासाधुत्वेऽपि त्रिशङ्क्वाद्ययाज्ययाजनादिवत्तपो– महत्त्वेनासाधुप्रयोगेऽपि ऋषीणां दोषाभावः। ते चासाधूनप्युच्चारितान् साधूकुर्वन्ति। स्मृतिपाठादन्यत्र स्वाच्छन्द्येनेदृशं प्रयोगं कुर्वन्तोऽस्मादृशः प्रत्यवयन्त्येवेति '' पतिः समास एवेति'' शब्देन्दुशेखरे नागेशो व्याजहार। ''यूस्त्र्याख्यौ नदीति'' सूत्रभाष्येऽपि छन्दोवत्कवयः कुर्वन्तीति व्याहृत्य ''नह्येषेष्टिरस्ती''ति

कण्ठरेवण पतञ्जलिरभ्युपैति। नदीसंज्ञासूत्रे हरदत्तौप्यमुवेवार्थ समर्थयते।

उच्छ्रृलास्तु– पाणिनिस्मृत्याऽननुगृहीतत्वेनास्य विश्वेदेवशब्दस्य साधुत्वं नापरिहार्य्यम् ऐन्द्रचान्द्रादिभेदेन व्याकरणानामष्टविधत्वेनान्यतमव्याकरणा – नुशासनमभ्युपेत्यैव पुराणादिषु तथाविधप्रयोगं व्यासादयश्चक्रुः। अतएव –

''यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात्।
पदरत्नानि किं तानि सन्ति पाणिनिगोष्पदे''।।

'अविज्ञातप्रबन्धस्य वचो वाचस्पतेरिवेति ''भारविश्लोके'' आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती, तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते'' इति माघश्लोके च परिदृश्यमानवाचस्पतिशब्दे शब्दकोस्तुभोक्तरीत्या षष्ठया अपि तत्पुरुषेकृतिबहुलमिति बहुलग्रहणेन यथा अलुक्समर्थ्यते तथैव विश्वेदेवशब्देऽपि सत्यपि समासे विभक्तेरलुकं सम्पाद्य तत्साधुत्वानुपपत्तिं परिजरिहरीति कोषकारः। वस्तुतस्तु तत्पुरुषे कृतीत्यनेन सप्तम्या एव अलुकः। प्रसिद्धया शब्दकौस्तुभोदीरितः पन्था पिच्छिलः प्रतिभाति।

**सन्दर्भ**


1. अष्टाध्यायी–6/2/106।
2. अष्टाध्यायी–3/2/3।
3. यजुर्वेदसंहितायाम्।
4. अमरकोषटीकायाम।
5. पुराणस्थगणभेदनामकाध्याये।
6. हरिवंशे।
7. नरसिंहपुराणस्य 57 अपिच 58 अध्याये च।
8. सन्ध्योपासनपुस्तके पृष्ठसंख्या–3।
9. अष्टाध्यायी–1/1/58।
10. महाभाष्ये।
11. कालिदासग्रन्थावल्याम्।
12. अलुक्समासे।
13. मार्कण्डेयपुराणे।
14. श्रीम गवते 6 स्कन्धस्य 10 अध्याये।
15. श्रीम गवते 7 स्कन्धस्य 10 अध्याये।